# SANSKRIT ( संस्कृत )

## झारखण्ड (JAC) 2017 (A) बोर्ड परीक्षा में पूछे गये प्रश्न एवं उनके आदर्श उत्तर

Time : 3 Hours ] **परीक्षा की तिथि : 1 मार्च, 2017** [ Full Marks : 100

विशेष निर्देशा:

(क) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति। (इस प्रश्नपत्र में चार खण्ड हैं)

(ख) सर्वेषां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां निर्धारिते स्थाने क्रमेण एवं लेखनीयानि। (सभी प्रश्नों के उत्तर उत्तर-पुस्तिका में निर्धारित स्थान पर क्रम से ही लिखना है।)

(ग) सर्वेषां प्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लेखनीयानि। (सभी प्रश्नों के उत्तर निर्देशानुसार केवल संस्कृत में लिखने होंगे)

---

### खण्ड-'क' : अपठितांश अवबोधनम् (15 अंकाः)

**प्र० 1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशम् उत्तरत-( निम्नलिखित दोनों अनुच्छेदों को पढ़कर उन पर आधारित प्रश्नों के उत्तर निर्देशानुसार लिखें )**

( अ ) प्रथमः अनुच्छेदः -

सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनं मन्यते। विद्यया एव जनाः जानन्ति यत किं कर्त्तव्यम् अस्ति किं च अकर्त्तव्यम्। अन्या एव ज्ञायते यत किम् उचितम् अस्ति किं च अनुचितम्। विद्याधनेन एव जानीमः यत् कः च कुमार्गः। विद्यया एव जनः संसारे सम्मानं आप्नोति। विद्याधनाय बारं बारं नमः।

प्रश्नाः-(I) **एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )-** 2×½=1

(क) किं धनम् उत्तम मन्यते? (ख) कया मनुष्यः सम्मानं प्राप्नोति?

(II) **पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )-** 2×1=2

(क) विद्यया किं ज्ञायते? (ख) कस्मै नमः?

(III) **निर्देशानुसारम् उत्तरत ( निर्देशानुसार उत्तर दीजिए )-** 4×½=2

(क) अस्मिन् अनुच्छेदे 'कर्त्तव्यम्' इति पदस्य किं विलोमपदं प्रयुक्तम्?

(ख) 'जानन्ति' इति क्रियापदस्य अस्मिन् अनुच्छेदे किं कर्तृपदम्?

(ग) 'विद्याधनाय' इति पदे का विभक्ति प्रयुक्ता?

(घ) 'ज्ञायते' इति कः लकारः?

**( आ ) द्वितीयः अनुच्छेदः-**

विज्ञानं मानवस्य हस्ते एतादृशं साधनम् अस्ति यत सः तस्यो सेवयै सदा तत्पर वर्तते। यथा यातायाताय बहूनि साधनानि सन्ति अधुना शीतात् रक्षायै तापयन्त्राणि, ग्रीष्मस्य तापं दूरीकर्तुं च व्यंजनानि, वातानुकूलनयन्त्राणि च सन्ति। खाद्यपेयवस्तुनां शीतीकरणाय उष्णीकरणाय चापि विविधानि यन्त्राणि आविष्कृतानि। गृहादिकं प्रकाशेन उज्ज्वलं कर्तुं समस्तविद्युत-उपकरणानां सञ्चालनाय च विद्युतः ऊर्जा प्रयुज्यते। अन्यच्च मनोरंजनाय दूरदर्शनं संदेशप्रेषणाय दूरभाषः अन्यविविधकार्येभ्यः संगणकम् इत्यादयः नवीनाः अविष्काराः। अद्यतनः मानवः विज्ञानं विना जीवनस्य कल्पनाम् अपि कथं करोतु? यथा सूत्रधारस्य इच्छया पुतलिका भ्रमति नृत्यति च तथा मानवोऽपि विज्ञानस्य दासः जातः। तस्य स्वतंत्रता छिन्ना जाता। तेन रचितानि अति भीषणानि शस्त्राणि तम् एव भीष्यन्ति। अधुना सः तेभ्यः रक्षितुम् उपायम् अन्विष्यति। हा! कीदृशीं विडम्बना।

प्रश्नाः-(I) **एकपदेन उत्तरत ( एक पद में उत्तर दीजिए )-** 2×1=2

(क) मानवेन कीदृशानि शस्त्राणि रचितानि?

(ख) पुतलिका कस्य इच्छया भ्रमति?

(II) **पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )-** 2×2=4

(क) विद्युतः ऊर्जा कुत्र प्रयुज्यते?

(ख) ग्रीष्मस्य तापं दूरी कर्तुं कानि साधनानि सन्ति?

(III) **यथानिर्देशम् उत्तरत ( निर्देशानुसार उत्तर दीजिए )-** 4×½=2

(क) 'कीदृशी विडम्बना' अत्र विशेषणपदं किम्?

(ख) 'तस्य सेवायै तत्परः' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ग) 'अन्धकारेण' अस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(घ) 'स्वाधीनता' अस्य पर्यायवाचीपदं किमत्र प्रयुक्तम्?

(IV) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत-
(इस अनुच्छेद के लिए एक समुचित शीर्षक लिखें) 2

### खण्ड-'ख' : रचनात्मकं कार्यम् (20 अंकाः)

**प्र० 2. पत्रलेखनम्-**

**विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं प्रति लिखते अस्मिन् पत्रे मञ्जूषाशब्दैः रिक्तस्थानपूर्तिः कृत्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत**-( विद्यालय के वार्षिकोत्सव के आधार पर मित्र के प्रति लिखे पत्र में मंजूषा शब्द की सहायता से खाली स्थानों को पूरा करके पुनः उत्तर-पुस्तिका में लिखें।) 10×½=5

मञ्जूषा-प्रणामाः, परीक्षाभवनात्, शिक्षानिदेशकः, मया, वार्षिकोत्सवः, व्यस्ताः, अस्माकम्, योगयेभ्यः, प्रियमित्रम्, मित्र।

(i) .........

प्रिय .....(ii)..... ।

(iii)......... तव पत्रम् अधिगतम्। मया पत्रेण ज्ञातं यत् गतसप्ताहे विद्यालयस्य (iv)......आसीत्। त्वं सर्वे अध्यापकाः च.....(v)..... अतिष्ठन्। कार्यक्रमस्य मुख्यातिथिः.....(vi)....आसीत्। सः .....(vii)..... कार्यक्रमस्य प्रशंसाम् अकरोत्। स .....(viii)..... छात्रेभ्यः पुरस्कारान् प्रायच्छत्। पितृभ्यां सादरं .....(ix).....

भवतः

.....(x)..... !

**प्र० 3. संवाद लेखनम्-**

**अधोलिखिते संवादे मञ्जूषायाः समुचित पदानि अवचित्य रिक्तस्थानानां पूर्ति कुरुत-** 5×1=5

(निम्नलिखित संवाद में मञ्जूषा से उचित वाक्य चुनकर पूरा करें।)

मञ्जूषा :

(i) एका शिक्षिका अस्ति। (ii) अहं पाठशालाम् गच्छामि।

(iii) स्नेहशील। (iv) अवश्यमेव।

(v) मम पाठशालायां पञ्चदश शिक्षकाः।

**कृष्णः** - त्वम् कुत्र गच्छसि?

**राधाः** - (I) ...............................

**कृष्णः** - तव पाठशालायां कति शिक्षकाः?

**राधाः** - (II) ...............................

**कृष्णः** - तव पाठशालायां शिक्षिका न अस्ति?

**राधाः** - (III) ...............................

**कृष्णः** - शिक्षकानाम् आचारः कीदृशः अस्ति?

**राधाः** - (IV) ...............................

**कृष्णः** - अहम् अपि तत्र अध्येतुम् इच्छामि।

**राधाः** - (V) ...............................

**प्र० 4. चित्रवर्णनम्-**

**अधः प्रदत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दसहायता पञ्च संस्कृतवाक्यानि लिखत-** 5×2=10

( मञ्जूषा-चिकित्सा, परिवहनम्, औषधम्, अस्वस्थजनः, चिकित्सकः, अभवत्, चिकित्साकेन्द्रे, अशुद्धम् पेयम् ददाति, चिकित्सोपकरः।)



अथवा, केवलं प्रज्ञाचक्षुर्भ्यः (केवल नेत्रहीन छात्रों के लिए)

प्रश्न 'वर्षा ऋतुः' इति विषयम् अधिकृत्य मञ्जूषापदसहायता च पञ्चसु संस्कृत वाक्येषु एकम् अनुच्छेदं लिखत। ('वर्षा-ऋतु' विषय पर मंजूषा के पदों की सहायता से पाँच संस्कृत वाक्यों में एक अनुच्छेद लिखें।) 5×2=10

(मञ्जूषा–दर्दुरां, वर्षा-ऋतौ, गृहीत्वा, मेघाच्छन्नम्, धारयति, कर्गदनौकाः, उपविष्टाः, आतपत्रम्।)

## खण्ड-'ग' : अनुप्रयुक्त व्याकरणम् (30 अंकाः)

प्र० 5. अधोलिखित वाक्येषु रेखांकित पदेषु संधिविच्छेदं संधि व विधाय प्रदत्तस्थाने उत्तराणि लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का संधि विच्छेद या संधि करके दिये गये स्थान में उत्तर लिखिए) 3×1=3

(क) उभावपि छात्रौ मेधाविनौ स्तः।(ख) अहङ्कारः विनाशाय भवति।
(ग) विद्याऽलंकृतो अपि दुः + जन परिहर्तव्यः।

प्र० 6. अधोलिखितेषु वाक्येषु रेखांकितपदानां समासविग्रहं समासं वा कृत्वा प्रदत्तस्थाने उत्तराणि लिखत– (निम्नलिखित वाक्यों में रेखांकित पदों का समास-विग्रह या समास करके दिए गए स्थान में उत्तर लिखिए) 4×1=4

(क) विद्यालये महोत्सवः आयोज्यते।
(ख) ग्रामस्य समीपं नदी प्रवहति। (ग) रामलक्ष्मणौ भ्रातरौ आस्ताम्।
(घ) पीतम् अम्बरं यस्य सः ममाराध्यः।

प्र० 7. अधोलिखितेषु वाक्येषु कोष्ठकपदानां प्रकृतिप्रत्ययौ योजयित्वा लेखनीयौ– (अधोलिखित अनुच्छेद को कोष्ठकों में दिये गये प्रकृति-प्रत्ययों को जोड़कर पूरा करें) 5×1=5

(i) उद्यमस्य ............ (महत् + तल) सर्वविदिता एव।
(ii) ........(बुधि + मतुप्) छात्राः पुरुषार्थे विश्वसन्ति न तु केवलं भाग्ये।
(iii) ............ (सुखार्थ + इन) कुतः विद्या?
(iv) छात्रजीवने परिश्रमस्य ............ (महत् + त्व) वर्तते।
(v) अत्र ............ (धर्म + ठक्) उत्सवः भवति।

प्र० 8. तालिकादत्तपदानि संयोज्य संस्कृते पञ्चसार्थकवाक्यानि रचयत– (तालिका में दिये गये पदों को जोड़कर संस्कृत में पाँच सार्थक वाक्यों की रचना करें।) 5×1=5

| | | | |
|---|---|---|---|
| छात्राः | ह्यः | वनभोजनाय | प्रार्थनां करिष्यन्ति। |
| | अधुना | चित्रं | अपठन् |
| | शनैः शनैः | प्रार्थनासभायां | निःसरन्ति |
| | श्वः | वर्गात् | रचिष्यन्ति |
| | एकदा | गीतामपि | अगच्छन् |

प्र० 9. अधोलिखिते वार्तालापे रिक्तस्थानपि वाच्यानुसारं पूरयित्वा प्रदत्तस्थाने उत्तराणि लिखत– 3×1=3

शिक्षकः– भो भो छात्राः! आकाशात् जलं के वर्षन्ति?
छात्राः – गुरुवर्यः आकाशात् मेघैः जलं (I) ............
शिक्षकः– छात्राः! मेघाः कान् सिञ्चन्ति?
छात्राः – गुरुवर्यः (II) ............ पादपाः सिञ्चयन्ते?
शिक्षकः– छात्राः! पादपाः अस्मभ्यं किं यच्छन्ति?
छात्राः – गुरुवर्यः। (III) ............ अस्मभ्यं फलानि दीयन्ते।

प्र० 10. अधोलिखितेषु वाक्येषु रिक्तस्थानानि अङ्कानां स्थाने संस्कृत पदेषु समयं लिखत– 4×1=4

(क) एकः श्रमिकः प्रातः ............ (5.00) वादने उत्तिष्ठति।
(ख) सः प्रातः ............ (8.30) वादने कार्यारम्भं करोति।
(ग) सः सायं ............ (4.45) वादनपर्यन्तं कार्यं करोति।
(घ) सः सायं ............ (5.15) वादने गृहं प्रत्यागच्छति।

11. अंकानां स्थाने संख्यावाचक विशेषणपदानि प्रयुज्य उत्तराणि लिखत– 4×½=2

अस्माकं पृथ्वी (i) 7 द्वीपेषु विभक्ता। (ii) 3 सागराः भारतभूमेः चरणप्रक्षालन कुर्वन्ति। (iii) 5 नदीभिः पञ्जाबप्रदेशः शोभते। (iv) 9 ग्रहेषु पृथिवी अन्यतमः ग्रहः, तत्र भारतभूमिः विराजते।

प्र० 12. अधोलिखितानां वाक्यानां रेखांकित पदानां संशोध्य पुनः लिखत– 4×1=4

(क) तत्रास्: बालिका पठन्ति। (ख) एकम् बालिका नृत्यति।
(ग) मम मित्रः मूर्खम् अस्ति। (घ) अद्य मया न लिखामि।

## खण्ड-'घ' : पठित अवबोधनम् (35 अंकाः)

प्र० 13. अधोलिखित गद्यांशं, श्लोकं, नाटयांशं च पठित्वा तदाधारित प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत–

(अ) गद्यांशः– यद्यपि दैवः प्रकोपो भूकम्पो नाम। यद्यपि तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते, प्रकृतिसमकक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञा कथयन्ति यत् बहुभूमिकाभवननिर्माणं न करणीयम्। तटबन्धं निर्माय बृहन्मात्रं नदीजलमपि नैकस्मिन् स्थले पुञ्जीकरणीयम् अन्यथा एवं कृते हि असंतुलनवशाद् भूकम्पसम्भवतिः वस्तुतः शान्तानि एवं पञ्चतत्वानि क्षितिजलपावकसमीरगगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते। अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति।

प्रश्नाः–(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए)– 2×½=1
(क) अद्यापि विज्ञानगर्वितः मानवः कीदृशः अस्ति?
(ख) कंषां प्रकोपः भूकम्पः अस्ति?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए)– 2×1=2
(क) भूतलस्य योगक्षेमाभ्यां कानि च तत्वानि कल्पन्ते?
(ख) कीदृशं भवननिर्माणं न करीणयम्?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दीजिए)– 4×½=2
(क) 'शान्तानि' इति पदे का विभक्तिः?
(ख) 'नैकस्मिन्' इति पदस्य सन्धिविच्छेदं कुरुत।
(ग) 'दैवः प्रकोपः' अनयोः पदयोः कः विशेष्यः?
(घ) 'दृश्यते' इति पदस्य कः मूलधातुः?

(आ) श्लोकः– एकेन राजहंसेन या शोभा सरसो भवेत।
न सा बकसहस्रेण परितस्तीरवासिना॥

प्रश्नाः–(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए)– 2×½=1
(क) सरसः तीरे के वसन्ति?
(ख) सरसः शोभायाः कारणभूतः कः अस्ति?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए)– 2×1=2
(क) सरसः शोभा केन भवति? (ख) सरसः शोभा केन न भवति?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दीजिए)– 4×½=2
(क) 'परितस्तीरवासिन' इति पदस्य संधि-विच्छेदं लिखत।
(ख) 'भवेत' इति क्रियापदस्य किं कर्तृपदं?
(ग) 'सरसः' इति पदे का विभक्ति?
(घ) 'राजहंसेन' इति पदस्य विशेषणपदं श्लोकात् चित्वा लिखत।

प्रश्न (इ) नाट्यांशः–

विदूषकः – (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति?
कुशः – अम्बा।
विदूषकः – किं कुपिता एवं भणति, उत प्रकृतिस्था?
कुशः – यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपतिनिरनुक्रोशस्य पुत्रौ, मा चापलम् इति।
विदूषकः – एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।
रामः – (स्वगतम्) धिङ् मामवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेव मनयुगभैरक्षैरनिर्भर्त्सयति (सवाष्पमवलोकयति)
रामः – अतिदीर्घः प्रवासोऽयं दारूणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि! न युक्तं च स्त्रगितमनुयोक्तुम्, विशेषतस्य पोषने। तत् कोऽत्राभ्युपायः?

प्रश्नाः–(I) एकपदेन उत्तरत (एक पद में उत्तर दीजिए)– 2×1=2
(क) निरनुक्रोश इति क एवं भणति? इति प्रश्नं कः पृच्छति?
(ख) कीदृशम् अविनयं दृष्ट्वा अम्बा पुत्रौ अधिक्षिपति?

(II) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए)– 1
रामः कुतूहलेनाविष्ट किं वेदितुम् इच्छति स्म?

(III) यथानिर्देशम् उत्तरत (निर्देशानुसार उत्तर दीजिए)– 4×½=2
(क) 'निरनुक्रोशस्य' इति पदे का विभक्ति?

(ख) 'पृच्छामि' पदस्य अत्र कर्ता पद कः?
(ग) 'एतयोर्जननी तेनावमानिता' इत्यत्र 'तेन' सर्वनामपदं कस्मै प्रयुक्तम्?
(घ) 'पुत्री' इति पदस्य पर्यायं कः?

**प्र० 14. अधोलिखितयोः कथनयोः भावम् उपयुक्तपदैः पूरयत– 3+3=6**

**(क) सम्पत्तौ च विपत्तौ च महतामेकरूपता।**
अस्य भावः अस्ति यत् यथा .....(i)..... उदये अस्तमये च रक्तवर्णः भवति तथैव सुखे च दुःखे च .....(ii)..... स्वभावे .....(iii)..... भवति।

**(ख) प्रकृति समक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव।**
अस्य भावः अस्ति यत मानवेन .....(i)..... अगणितानि रहस्यानि उद्घाटितानि परन्तु .....(ii)..... यावत तेभ्यः .....(iii)..... रहस्यानि अनुद्घाटितानि सन्ति।

**प्र० 15. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तराणि लिखत– 1½+1½=3**

(क) प्रायो दरिद्रशिशवः परमन्दिराणां द्वारेषु दत्तकरपल्लवलीनदेहाः।
लज्जानिगूढवसचो बत भोक्तुकामा भोक्तारमर्धनयनेन विलोकयन्ति॥

अन्वयः–बत् प्रायः ..........(i) द्वारेषु दत्तकरपल्लवलीनदेहाः .........(ii)...... भोक्तुमादद्रिशिशवः भोक्तारम् .........(iii) विलोकयन्ति।

(ख) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

मनुष्याणां (i)......... महान् रिपु आलस्यम्, (ii)......... बन्धुः न अस्ति यं कृत्वा (मनुष्यः) न (iii).........।

**प्र० 16. रेखांकितपदानि आधृत्य प्रश्न-निर्माणं कुरुत– 4×1=4**

(i) तस्य मृतशरीरं राजमार्ग निकषा वर्तते।
(ii) शिशुजनस्यअद्य अशनं जातम्। (iii) सः भारवेदनया कुन्दति स्म।
(iv) भृत्यः स्वामिनि रोदिति रोदति।

**प्र० 17. अधोलिखितानि वाक्यानि कथाक्रमानुसारं पुनः लिखत– 8×½=4**

(i) गलबध शृगालकः व्याघ्रः पुनः पलायितः।
(ii) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।
(iii) अतिथिः चौरस्य पादध्वनिना प्रबुद्धः।
(iv) तस्य तारस्वरेण ग्रामवासिनः प्रबुद्ध।
(v) वस्तुतः शान्तानि पञ्चतत्वानि भूतलस्य योगक्षेमाभयां कल्पन्ते।
(vi) तुषान स्वर्णकारेभ्यः देहि।
(vii) तस्यामनेककोटिसारः श्रष्टिपुत्रः शक्ति कुमारो नामासीत्।
(viii) विचित्रा दैवगतिः।

**प्र० 18. अधोलिखितानां शब्दानां विलोम पदैः सहमेलनं कुरुत– 6×½=3**

| शब्दाः | विलोमपदानि |
|---|---|
| (i) सत्यम् | गुण |
| (ii) अत्र | पश्चात् |
| (iii) दोषः | असत्यम् |
| (iv) पूर्वम् | तत्र |
| (v) निर्गतः | दिवा |
| (vi) निशा | ग्रहण। |

## उत्तर

### खण्ड-'क' : अपठितांश अवबोधनम् (15 अंकाः)

1. (अ) (I) (क) विद्या (ख) विद्यया।
(II) (क) विद्यया ज्ञायते यत् किम् उचितम् अस्ति किं च अनुचितम्।
(ख) विद्याधनाय नमः।
(III) (क) अकर्त्तव्यम् (ख) जनाः (ग) चतुर्थी (घ) लट्।
(आ) (I) (क) भीषणानि (ख) सूत्रधारस्य।
(II) (क) गृहादिकानि प्रकाशेन उज्ज्वलं कर्तु समस्त-विद्युत-उपकरणां सञ्चलनाय च विद्युतः ऊर्जा प्रयुज्यते।
(ख) ग्रीष्मस्य तापं दूरी कर्तुं व्यजनानि वातानुकूलनयंत्राणि साधनानि-सन्ति।
(III) (क) कीदृशी (ख) मानवाय (ग) प्रकाशेन (घ) स्वतंत्रता।
(IV) विज्ञानस्य चमत्कारः।

### खण्ड-'ख' : रचनात्मकं कार्यम् (20 अंकाः)

2. (i) परीक्षाभ्‍वनात्, (ii) मित्र (iii) मया (iv) वार्षिकोत्सवः (v) व्यस्ताः
(vi) शिक्षानिदेशकः (vii) अस्माकं (viii) योग्येभ्यः (ix) प्रणामाः (x) प्रियमित्रम्।

3. (i) अहं पाठशालाम् गच्छामि।
(ii) मम पाठशालायां पञ्चदश शिक्षिकाः सन्ति।
(iii) एका शिक्षिका अस्ति। (iv) स्नेहशील (v) अवश्यमेव।

4. (i) एतत् चित्रं चिकित्साकेन्द्रस्य अस्ति।
(ii) अत्र अस्वस्थजनाः आगच्छन्ति।
(iii) चिकित्सकः रूग्णानाम् उपचारं करोति।
(iv) फलके चिकित्सोपरकः अस्ति।
(v) अत्र चिकित्सा-परिवहनम् अस्ति।

### खण्ड-'ग' : अनुप्रयुक्त व्याकरणम् (30 अंकाः)

5. (क) उभौ + अपि (ख) अहम् + काराः (ग) दुर्जनः।
6. (क) महान् उत्सवः (ख) उपग्रामम् (ग) रामः च लक्ष्मणः च (घ) पीताम्बरः।
7. (i) महत्ता, (ii) बुद्धिमन्तः (iii) सुखार्थिनः (iv) महत्त्वम् (v) धार्मिक।
8. (i) छात्राः ह्यः वनभोजनाय अगच्छन्।
(ii) छात्राः अधुना चित्रं रचिष्यन्ति।
(iii) छात्राः शनैः शनैः वर्गात् निःसरन्ति।
(iv) छात्राः श्वः प्रार्थनासभायां प्रार्थनां करिष्यन्ति।
(v) छात्राः एकदा गीतामपि अपठन्।
9. (i) वृष्यते (ii) पेयैः (iii) पादपैः।
10. (क) पञ्च (ख) सार्द्धअष्ट (ग) पादोनपञ्च (घ) सपादपञ्च।
11. (i) सप्त (ii) त्रयः (iii) पञ्च (iv) नव।
12. (क) चतस्रः (ख) एका (ग) मित्रम् (घ) लिख्यते।

### खण्ड-'घ' : पठित अवबोधनम् (35 अंकाः)

13. (अ) (I) (क) वामनकल्पः (ख) देवानाम्।
(II) (क) भूतलस्य योगक्षेमाभ्यां पञ्चतत्वानि क्षिति-जल-पावक-समीर गगनानि च कल्पन्ते।
(ख) बहुभूमिकं भवननिर्माणं न करणीयम्।
(III) (क) प्रथमा (ख) न + एकस्मिन् (ग) प्रकोपः (घ) दृश्।
(आ) (I) (क) राजहंसाः (ख) राजहंसः
(II) (क) सरसः शोभा राजहंसेन भवति।
(ख) बकसहस्रेण सरसः शोभा न भवति।
(III) परितः + तीरवासिनः (ख) शोभा (ग) षष्ठी (घ) एकेन।
(इ) (I) (क) विदूषकः (ख) बालभावजनितम्
(II) राम कुतूहलेनाविष्टः कुशलवयोः मातुर्नाम वेदितुम् इच्छति स्म।
(III) षष्ठी (ख) अहम् (ग) रामाय (घ) दारकौ।
14. (क) (i) सूर्यः (ii) महापुरुषाणां (iii) समानता।
(ख) (i) प्रकृतेः (ii) अधुना (iv) अधिकानि।
15. (क) (i) परमन्दिराणां (ii) लज्जानिगूढवचसः (iii) अर्धनयनेन।
(ख) (i) शरीरस्थः (ii) उद्यमसमः (iv) अवसीदति।
16. (i) तस्य मृतशरीरं कं निकषा वर्तते? (ii) कस्य अद्य अशनं जातम्?
(iii) सः कया कुन्दति स्म? (iv) भृत्यः कस्मिन् रोदिति रोदति?
17. (i) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम आगच्छत्।
(ii) गलबध शृंगालकः व्याघ्रः पुनः पलायितः।
(iii) विचित्रा दैवगतिः।
(iv) अतिथिः चौरस्य पादध्वनिना प्रबुद्धः।
(v) तस्य तारस्वेरण ग्रामवासिनः प्रबुद्धः।
(vi) तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्ति कुमारोनामासीत्।
(vii) तुषान 'स्वर्णकारेभ्यः' देहि।
(viii) वस्तुतः शान्तानि पञ्चतत्वानि भूतलस्य योगक्षेमामयां कल्पन्ते।
18. (i) असत्यम्, (ii) तत्र, (iii) गुणः (iv) पश्चात् (v) ग्रहण (vi) दिवा।

■